# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-३ ( Sem_6 )** **प्रश्नपत्र-४** **गुणाः - ७०**

**विषयः ज्योतिषशास्त्रम्** OE 3.6.6 **समयः - ११:०० तः ०२:००**

**दिनाङ्कः - २१-०४-२०१६** **सन्दर्भग्रन्थः - जातकाभरणम्**

---

**प्रश्नः -१ अधोलिखितेषु कयोश्चिद् द्वयोः ससन्दर्भव्याख्या कार्या । ०८**

*१. अपारहोरागमपारगामी पाट्यां च बीजे सुतरां प्रगल्भः ।*
*सद्गोल विद्या कुशलः स एव भवेत्फलादेशविधौ समर्थः ॥*

*२. पादेमुहूर्ते वेलायां वृक्षे च पुरुषाकृतौ ।*
*अनिष्टमशुभाधिक्ये शुभधिक्ये शुभं फलम् ॥*

*३. दाराभिमानः सुतरां दयालुः कुलानुवृत्तः किल चारुशीलः ।*
*देवद्विजार्चाभिरतो विनीतो मर्त्यः प्रजाधीरासमुद्भवः स्यात् ॥*

**प्रश्नः -२ अधोलिखितयोः कस्यश्चिदेकस्य उपरि वर्णनं कुरुत । ०८**

*१ शुक्लसंवत्सरजातफलम् । २ वर्षाऋतुजातफलं ग्रन्थानुसारं कुरुत ।*

**प्रश्नः -३ निम्नलिखितयोः कस्य चिदेकस्य उपरि टिप्पणीं लिखतु । ०२**

*१. खरसंवतत्सर जातफलम् । २ मूलवृक्षफलम् ।*

**प्रश्नः -४ अधोलिखितेषु कयोश्चिद् द्वयोः लधुत्तरं लिखत । ०२**

*१. जातकाभरणकर्तुर्नाम किम् ?*

*२. प्रमोदजन्मा मनुजः कीदृशो भवति ?*

*३. वसन्तऋतुजातमनुजः कस्मिन् शास्त्रे प्रवीणः भवति ?*

*४. कदा मानवः नरेन्द्रमन्त्री भवति ?*

**विभागः-२**

**प्रश्नः -५ अधोलिखितेषु कयोश्चिद् द्वयोः ससन्दर्भव्याख्या कार्या । ०८**

*१. रूपं तथा वर्णविनिर्णयश्च चिह्नानि जातर्वयसः प्रमाणम् ।*
*सुखानि दुःखान्यपि साहसं च लग्ने विलोक्यं खलुसर्वमेतत् ॥*

*२. ग्रस्ते विधौ लग्नगताश्चपापा स्त्रिकोणगा जन्मपि शाचकस्य ।*
*ग्रस्ते विधौ लग्नगते तथैव नेत्रोपघातः खलु कल्पनीयः ॥*

*३. श्यामः शिरालश्च कलाविधिज्ञः कुतूहली कोमलवाक्विदोषी ।*
*रजोधिको मध्यमरूपधृक्या दाताम्रनेत्रो द्विजराजपुत्रः ॥*

**प्रश्नः -६ कस्यचिदेकस्योपरि निबन्धं निबन्धयत ०८**

*१ शन्यगारगते भौमे शनिदृष्टिफलं लिखत । २ सूर्यस्वरूपं ग्रन्थोक्तदिशा वर्णयत ।*

**प्रश्नः -७ कयोश्चिद् द्वयोः टिप्पणीं कार्या ।** **०४**

*१ भौमस्वरूपम् । २ व्रणमशकादिज्ञानम् ।*

*३ मीनराशिगतसूर्यफलम् । ४ भौमगेस्थितबुधे रविदृष्टिफलम् ।*

**प्रश्नः -८ अधोलिखितेषु पञ्चानामतिलघूत्तरं लिखत ।** **०५**

*१ सूर्यस्वरूपं कीदृशमस्ति ? २ त्रिकोणस्थानानि कानि ?*

*३ सौम्यग्रहाः के सन्ति ? ४ दशनाभिधातयोगः कदा भवति ?*

*५ पिङ्गाक्षशब्दस्यार्थः कः ? ६ मिथुनराशिगतचन्द्रस्य किं फलम्*

*७ क्षितिसूनुशब्दार्थः कः ?*

**विभागः -३**

**प्रश्नः -९ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां कुरुत ।** **०८**

*१ दिनपतौ युवतौ समवस्थिते नरपतेर्द्रविणं हि नरो लभेत् ।*

*मृदुवचाः श्रुतगेयपरायणः सुमहिमापिहिताहितः ॥*

*२ कायकान्तिरहितश्च नितान्तं स्थानसञ्चलनतोऽपि च दुःखी ।*

*अन्यकर्मनिरतश्च नरः स्याज्जीवधाम्नि कुसुतेऽर्कजदृष्टे ॥*

*३ श्रीया विमुक्तो हतकायकान्ति र्भयामयाभ्यां सहितः कुशीलः ।*

*नृपप्रकोपातिकृशो मनुष्यः सीमन्तीनीसद्मनि पद्मनीशे ॥*

**प्रश्नः -१० अधोलिखितयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत** **०८**

*१ ग्रन्थोक्तदिशाचतुर्थभावस्थितसूर्यफलम् । २ द्वितीयभावस्थितचन्द्रग्रहफलम् ।*

**प्रश्नः -११ अधोलिखितेषु कयोश्चिद् द्वयोः उपरि टिप्पणीं लिखतु ।** **०४**

*१ सिंहस्थसूर्यफलम् । २ भौमगृहे बुधे चन्द्र दृष्टिफलम् ।*

*३ मेषराशिगते चन्द्रे गुरुदृष्टिफलम् ४ वृश्चिकराशिगते चन्द्रे शनिदृष्टिफलम्*

**प्रश्नः -१२ निम्नाङ्कितेषु केषाञ्चित् पञ्चानाम् अतिलघूतरं यच्छत ।** **०५**

*१ सद्भोगसौभाग्यसुखेः समेतः मानवः कदा भवति ?*

*२ करे मत्स्ययुतो नरः कस्मिन् योगे भवति ?*

*३ दिनमणिशब्दप्रयोगः कस्य कृते प्रयुज्यते ?*

*४ फुल्लाक्षशब्दस्यार्थः कः ? ५ किन्नामदृष्टिः ।*

*६ कं भावं सर्वेग्रहाः पूर्णदृष्ट्या पश्यन्ति । ७ वृषराशेः स्वामी, विलासशब्दस्य अर्थश्च लिखतु ।*